# Taittiriya Samhita 1

# તૈત્તિરીયસંહિતા ૧ કૃષ્ણયજુર્વેદીય

## Document Information

Text title : taittiriiya samhitaa 1

File name : taitsamhita1.itx

Category : veda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer rajsand at yahoo.com

Proofread by : VENKATAVARAHAN <ternandanan at satyam.net.in and Rajagopal Iyer rajsand at yahoo.com

Latest update : August 3, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2020

*sanskritdocuments.org*

# Taittiriya Samhita 1

# તૈત્તિરીયસંહિતા ૧ કૃષ્ણયજુર્વેદીય

॥ કૃષ્ણયજુર્વેદીય તૈત્તિરીય સંહિતા ॥

॥ પ્રથમં કાણ્ડમ્। ॥

ઇષેત્વોર્જેત્વાવાયવસ્સ્થોપાયવસ્સ્થદેવોવસ્સવિતા-
પ્રાર્પયતુશ્રેષ્ઠતમાયકર્મણ
આપ્યાયધ્વમઘ્નિયાદેવભાગમૂર્જસ્વતીઃપયસ્વતીઃપ્રજાવતીરનમીવા
અયક્ષ્મામાવસ્તેન
ઈશતમાઽઘશꣳ સોરુદ્રસ્યહેતિઃપરિવોવૃણક્તુ-
ધ્રુવાસ્મિન્ગોપતૌસ્યાતબહ્વીર્યજમાનસ્ય
પશૂન્પાહિ ॥ ૧ ॥ ॥ ૧.૧.૧ ॥

યજ્ઞસ્યઘોષદસિપ્રત્યુષ્ટꣳ રક્ષઃપ્રત્યુષ્ટાઅરાતયઃપ્રેયમગાદ્ધિષણા
બર્હિરચ્છમનુનાકૃતાસ્વધયાવિતષ્ટાત
આવહન્તિકવયઃપુરસ્તાદ્દેવેભ્યોજુષ્ટમિહ
બર્હિરાસદેદેવાનામ્પરિષૂતમસિવર્ષવૃદ્ધમસિ-
દેવબર્હિર્માત્વાન્વઙ્માતિર્યક્પર્વતે
રાધ્યાસમાચ્છેત્તાતેમારિષન્દેવબર્હિશ્શતવલ્શંવિરોહસહસ્રવલ્શાઃ ॥

૨॥ વિવયꣳ
રુહેમપૃથિવ્યાસ્સમ્પૃચઃપાહિસુસમ્ભૃતાત્વાસમ્ભરામ્યદિત્યૈરાસ્નાઽસીન્દ્રાણ્યૈ
સન્નહનમ્પૂષાતેગ્રન્થિઙ્ગ્રથ્નાતુસતેમાઽઽસ્થાદિન્દ્રસ્યત્વાબાહુભ્યામુદ્યચ્છે
બૃહસ્પતેર્મૂર્ધ્નાહરામ્યુર્વન્તરિક્ષમન્વિહિદેવઙ્ગમમસિ
॥ ૩ ॥ ॥ ૧.૧.૨ ॥

શુન્ધધ્વંદૈવ્યાયકર્મણેદેવયજ્યાયૈમાતરિશ્વનોઘર્મોઽસિદ્યૌરસિપૃથિવ્યસિ

વિશ્વધાયા

અસિપરમેણધામ્નાદૃꣳહસ્વમાહ્વાર્વસૂનામ્પવિત્રમસિશતધારં
વસૂનામ્પવિત્રમસિસહસ્રધારꣳ હુતસ્તોકોહુતોદ્રપ્સોઽગ્નયેબૃહતેનાકાયસ્વાહા
દ્યાવાપૃથિવીભ્યાꣳ સાવિશ્વાયુસ્સાવિશ્વવ્યચાસ્સાવિશ્વકર્માસમ્પૃચ્યધ્વમૃતાવરી
રૂર્મિણીર્મધુમત્તમામન્દ્રાધનસ્યસાતયેસોમેનત્વાઽઽતનચ્મીન્દ્રાયદધિ
વિષ્ણોહવ્યꣳ રક્ષસ્વ ॥ ૪॥ ॥ ૧.૧.૩ ॥

કર્મણેવાંદેવેભ્યશ્શકેયંવેષાયત્વાપ્રત્યુષ્ટꣳ રક્ષઃપ્રત્યુષ્ટાઅરાતયોધૂર
સિધૂર્વધૂર્વન્તંધૂર્વન્યોસ્માન્ધૂર્વતિતંધૂર્વયંવયંધૂર્વામસ્ત્વંદેવાનામસિ
સસ્નિતમમ્પપ્રિતમઞ્જુષ્ટતમ્ંવહ્નિતમન્દેવહૂતમમહ્રુતમસિહવિર્ધાનંદૃꣳ હ
સ્વ
માહ્વાર્મિત્રસ્યત્વાચક્ષુષાપ્રેક્ષેમાભેર્માસંવિક્થામાત્વાહિꣳ સિષમુરુવા
તાયદેવસ્યત્વાસવિતુઃપ્રસવેઽશ્વિનોર્બાહુભ્યામ્પૂષ્ણોહસ્તાભ્યામગ્નયેજુષ્ટં
નિર્વપામ્યગ્નીષોમાભ્યામિદંદેવાનામિદમુનસ્સહસ્ફાત્યૈત્વાનાઽરાત્યૈસુવરભિ
વિખ્યેષંવૈશ્વાનરંજ્યોતિર્દૃꣳ હન્તાંદુર્યાદ્યાવાપૃથિવ્યોરુર્વન્તરિક્ષમન્વિહ્યદિત્યાસ્
ત્વોપસ્થેસાદયામ્યગ્નેહવ્યꣳ રક્ષસ્વ ॥ ૧.૧.૪ ॥

દેવોવઃસવિતોત્પુનાત્વચ્છિદ્રેણપવિત્રેણવસોસ્સૂર્યસ્યરશ્મિભિરાપોદેવીરગ્રેપુવોઽગ્રે
ગુવોઽગ્રઇમંયજ્ઞન્નયતાગ્રેયજ્ઞપતિંધત્તયુષ્માનિન્દ્રોઽવૃણીતવૃત્રતૂર્યે
યૂયમિન્દ્રમવૃણીધ્વંવૃત્રતૂર્યેપ્રોક્ષિતાસ્થાઽગ્નયેવોજુષ્ટંપ્રોક્ષામ્યગ્નીષોમા
ભ્યા ꣳ શુન્ધધ્વંદૈવ્યાયકર્મણેદેવયજ્યાયાઅવધૂત ꣳ રક્ષોઽવધૂતા
અરાતયોદિત્યાસ્ત્વગસિપ્રતિત્વાપૃથિવીવેત્વધિષવણમસિવાનસ્પત્યમ્પ્રતિ
ત્વાઽદિત્યાસ્ત્વગ્વેત્વગ્નેસ્તનૂરસિવાચોવિસર્જનંદેવવીતયેત્વાગૃહ્ણામ્યદ્રિરસિવાનસ્પત્યસ્સ
ઇદંદેવેભ્યોહવ્યꣳ સુશમિશમિષ્વેષમાવદોર્જમાવદદ્યુમદ્વદતવયꣳ
સઙ્ઘાતંજેષ્મવર્ષવૃદ્ધમસિપ્રતિત્વાવર્ષવૃદ્ધંવેત્તુપરાપૂત ꣳ રક્ષઃ
પરાપૂતાઅરાતયોરક્ષસામ્ભાગોઽસિવાયુર્વોવિવિનક્તુદેવોવસ્સવિતાહિરણ્યપાણિઃપ્રતિ
ગૃહ્ણાતુ ॥ ૧.૧.૫ ॥

અવધૂત ꣳ રક્ષોઽવધૂતાઅરાતયોઽદિત્યાસ્ત્વગસિપ્રતિત્વાપૃથિવીવેત્તુદિવસ્કમ્ભનિરસિ
પ્રતિત્વાઽદિત્યાસ્ત્વગ્વેત્તુધિષણાઽસિપર્વત્યાપ્રતિત્વાદિવસ્સ્કમ્ભનિર્વેત્તુ

ધિષણાઽસિપાર્વતેયીપ્રતિત્વાપર્વતિર્વેત્તુદેવસ્યત્વાસવિતુઃપ્રસવેઽશ્વિનોર્બાહુભ્યાં
પૂષ્ણોહસ્તાભ્યામધિવપામિધાન્યમસિધિનુહિદેવાન્પ્રાણાયત્વાઽપાનયત્વાવ્યાનાય
ત્વાદીર્ઘામનુપ્રસિતિમાયુષેધાંદેવોવસ્સવિતાહિરણ્યપાણિઃપ્રતિગૃહ્ણાતુ
॥ ૧.૧.૬ ॥

ધૃષ્ટિરસિબ્રહ્મયચ્છાપાગ્નેઽગ્નિમામાદંʼજહિનિષ્ક્રવ્યાદꣳ સેધાઽઽદેવયજમ્
વહનિર્દગ્ધ ꣳ રક્ષોનિર્દગ્ધાઅરાતયોધ્રુવમસિપૃથિવીંદૃꣳ હાઽઽયુર્દૃꣳ હ
પ્રજાંદૃꣳહસજાતાનસ્મૈયજમાનાયપર્યૂહધર્ત્રમસ્યન્તરિક્ષંદૃꣳ હપ્રાણં
દૃꣳહાપાનંદૃꣳહસજાતાનસ્મૈયજમાનાયપર્યૂહધરુણમસિદિવન્દૃꣳ હ
ચક્ષુર્દૃꣳ હશ્રોત્રંદૃꣳ હસજાતાનસ્મૈયજમાનાયપર્યૂહધર્માસિદિશોદૃꣳ હ
યોનિંદૃꣳ હપ્રજાંદૃꣳહસજાતાનસ્મૈયજમાનાયપર્યૂહચિતસ્સ્થપ્રજામસ્મૈ
રયિમસ્મૈસજાતાનસ્મૈયજમાનાયપર્યૂહભૃગૂણામઙ્ગિરસાંતપસાતપ્યધ્વંયાનિ
ઘર્મેકપાલાન્યુપચિન્વન્તિવેધસઃ।
પૂષ્ણસ્તાન્યપિવ્રતૈન્દ્રવાયૂવિમુઞ્ચતામ્ ॥ ૧.૧.૭ ॥

સંવપામિસમાપોઅદ્ભિરગ્મતસમોષધયોરસેનસꣳ રેવતીર્જગતીભિર્મધુમતીર્
મધુમતીભિસ્સૃજ્યધ્વમદ્ભ્યઃપરિપ્રજાતાસ્સ્થસમદ્ભિઃપૃચ્યધ્વઞ્જનયત્યૈત્વાસંયૌ
મ્યગ્નયેત્વાગ્નીષોમાભ્યામ્મખસ્યશિરોસિઘર્મોઽસિવિશ્વાયુરુરુપ્રથસ્વોરુતેયજ્ઞપતિઃ
પ્રથતાન્ત્વચંગૃહ્ણીષ્વાન્તરિત ꣳ રક્ષોઽન્તરિતાઅરાતયોદેવસ્ત્વાસવિતાશ્રપયતુ
વર્ષિષ્ઠેઅધિનાકેઽગ્નિસ્તેતનુવમ્માઽતિધાગગ્નેહવ્યꣳ રક્ષસ્વસમ્બ્રહ્મણા
પૃચ્યસ્વૈકતાયસ્વાહાદ્વિતાયસ્વાહાત્રિતાયસ્વાહા ॥ ૧.૧.૮ ॥

આદદઇન્દ્રસ્યબાહુરસિદક્ષિણસ્સહસ્રભૃષ્ટિશ્શતતેજાવાયુરસિતિગ્મતેજાઃપૃથિવિ
દેવયજન્યોષધ્યાસ્તેમૂલમ્માહિꣳસિષમપહતોઽરરુઃપૃથિવ્યૈવ્રજંગચ્છગોસ્થાનં
વર્ષતુતેદ્યૌર્બધાનદેવસવિતઃપરમસ્યામ્પરાવતિશતેનપાશૈર્યોઽસ્માન્દ્વેષ્ટિ
યંચવયંદ્વિષ્મસ્તમતોમામૌગપહતોઽરરુઃપૃથિવ્યૈદેવયજન્યૈવ્રજંગચ્છગોસ્થાનમ્વર્ષતુતેદ્યૌર્બધાનદેવ-
સવિતઃપરમસ્યામ્પરાવતિશતેનપાશૈર્યોઽસ્માન્દ્વેષ્ટિ
યંચવયંદ્વિષ્મસ્તમતોમામૌગપહતોઽરરુઃપૃથિવ્યા
અદેવયજનોવ્રજંગચ્છ
ગોસ્થાનંવર્ષતુતેદ્યઓર્બધાનદેવસવિતઃપરમસ્યામ્પરાવતિશતેનપાશૈર્યોઽસ્માન્

દ્વેષ્ટિયંચવયંદ્વિષ્મસ્તમતોમામૌગરરુસ્તેદિવમ્માસ્કાન્
વસવસ્ત્વાપરિગૃહ્ણન્તુ
ગાયત્રેણછન્દસારુદ્રસ્ત્વાપરિગૃહ્ણન્તુત્રૈષ્ટુભેનછન્દસાऽऽદિત્યાસ્ત્વાપરિગૃહ્ણન્તુ
જાગતેનછન્દસાદેવસ્યસવિતુસ્સવેકર્મકૃણ્વન્તિવેધસઋતમસ્યૃતસદનમસ્યૃતશ્રી
રસિધા અસિસ્વધા
અસ્યુર્વીચાસિવસ્વીચાસિપુરાક્રૂરસ્યવિસૃપોવિરફ્શિન્નુદાદાયપૃથિવીં
જીરદાનુર્યામૈરયચ્ચન્દ્રમસિસ્વધાભિસ્તાંધીરાસો
અનુદૃશ્યયજન્તે ॥ ૧. ૧. ૯ ॥

પ્રત્યુષ્ટ ँ રક્ષઃપ્રત્યુષ્ટા
અરાતયોऽગ્નેર્વસ્તેજિષ્ઠેનતેજસાનિષ્ટપામિગોષ્ઠં
માનિર્મૃક્ષંવાજિનંત્વાસપત્નસાહ ँ સં
માર્જ્મિવાચમ્પ્રાણંચક્ષુશ્શ્રોત્રમ્પ્રજાં
યોનિમ્માનિર્મૃક્ષંવાજિનીંત્વાસપત્નસાહી ँ સમ્મંજ્મ્યાશાસાનાસૌમનસમ્પ્રજા ँ
સૌભાગ્યંતનૂમ્ऽગ્નેરનુવ્રતાભૂત્વાસંનહ્યેસુકૃતાયકમ્ ॥
સુપ્રજસસ્ત્વાવય ँ સુપત્નીરુપસેદિમ। અગ્નેસપત્નદમ્ભનમદબ્ધાસોઅદાભ્યમ્ ॥
ઇમંવિષ્યામિવરુણસ્યપાશંયમબધ્નીતસવિતાસુકેતઃ।
ધાતુશ્ચયોનૌસુકૃતસ્યલોકેસ્યોનમ્મેસહપત્યાકરોમિ ॥
સમાયુષાસમ્પ્રજયાસમગ્નેવર્ચસાપુનઃ।
સમ્પત્નીપત્યાऽહંગચ્છેસમાત્માતનુવામમ ॥

મહીનામ્પયોऽસ્યોષધીના ँ રસસ્તસ્યતેऽક્ષીય્માણસ્યનિર્વપામિમહીનાં
પયોऽસ્યોષધીના ँ રસોऽદબ્ધેનત્વાચક્ષુષાऽવેક્ષેસુપ્રજાસ્ત્વાયતેજોऽસિ
તેજોऽનુપ્રેહ્યગ્નિસ્તેતેજોમાવિનૈદગ્નેર્જિહ્વાऽસિસુભૂર્દેવાનાંધામ્નેધામ્નેદેવેભ્યો
યજુષેયજુષેભવશુક્રમસિજ્યોતિરસિતેજોऽસિદેવોવસ્સવિતોત્પુનાત્વચ્છિદ્રેણપવિત્રેણવસોઃ
સૂર્યસ્યરશ્મિભિશ્શુક્રંત્વાશુક્રાયાંધામ્નેધામ્નેદેવેભ્યોયજુષેયજુષેગૃહ્ણામિ
જ્યોતિસ્ત્વાજ્યોતિષ્યર્ચિસ્ત્વાऽર્ચિષિધામ્નેધામ્નેદેવેભ્યોયજુષેયજુષેગૃહ્ણામિ
॥ ૧. ૧. ૧૦ ॥

કૃષ્ણોऽસ્યાખરેષ્ઠોऽગ્નયેત્વાસ્વાહાવેદિરસિબર્હિષેત્વાસ્વાહાબર્હિરસિસ્રુગ્ભ્યસ્ત્વા

સ્વાહાદિવેત્વાઽન્તરિક્ષાયત્વાપૃથિવ્યૈત્વાસ્વધાપિતૃભ્યઊર્ગ્ભવબર્હિષદ્ભ્યઊર્જા
પૃથિવીંગચ્છતવિષ્ણોસ્તૂપોઽસ્યૂર્ણામ્રદસંત્વાસ્તૃણામિસ્વાસસ્થંદેવેભ્યોગન્ધર્વોઽસિ
વિશ્વાવસુર્વિશ્વસ્માદીષતોયજમાનસ્યપરિધિરિડ
ઈડિત ઇન્દ્રસ્યબાહુરસિદક્ષિણો  યજમાનસ્યપરિધિરિડ
ઈડિતોમિત્રાવરુણૌત્વોત્તરતઃપરિધત્તાંધ્રુવેણધર્મણાયજમાનસ્ય
પરિધિરિડ
ઈડિતસ્સૂર્યસ્ત્વાપુરસ્તાત્પાતુકસ્યાશ્ચિદભિશસ્ત્યાવીતિહોત્રંત્વાકવેદ્યુમન્ત ꣳ
સમિધીમહ્યગ્નેબૃહન્તમધ્વરેવિશોયન્ત્રેસ્થોવસૂના ꣳ રુદ્રાણામાદિત્યાના ꣳ સદસિ
સીદજુહૂરુપભૃદ્ધ્રુવાઽસિઘૃતાચીનામ્નાપ્રિયેણનામ્નાપ્રિયેસદસિસીદૈતા
અસદન્
થ્સુકૃતસ્યલોકેતાવિષ્ણોપાહિપાહિયજ્ઞમ્પાહિયજ્ઞપતિમ્પાહિમાંયજ્ઞનિયમ્
॥ ૧. ૧. ૧૧ ॥

ભુવનમસિવિપ્રથસ્વાઽગ્નેયષ્ટરિદન્નમઃ।
જુહ્વેહ્યગ્નિસ્ત્વાહ્વયતિદેવયજ્યાયા  ઉપભૃદેહિ
દેવસ્ત્વાસવિતાહ્વયતિદેવયજ્યાયાઅગ્નાવિષ્ણૂમાવામવક્રમિષં
વિજિહાથામ્મામાસં
તાપ્સંલોકમ્મેલોકકૃતૌકૃણુતંવિષ્ણોસ્થાનમસીત
ઇન્દ્રોઅકૃણોદ્વીર્યાણિસમારભ્યોર્ધ્વો
અધ્વરોદિવિસ્પૃશમહ્રુતોયજ્ઞોયજ્ઞપતેરિન્દ્રાવાન્થ્સ્વાહાબૃહદ્ભાઃપાહિમાઽગ્ને
દુશ્ચરિતાદામાસુચરિતેભજમખસ્યશિરોઽસિસમ્જ◌ ◌્યોતિષાજ્યોતિરઙ્ક્તામ્
॥ ૧. ૧. ૧૨ ॥

વાજસ્યમાપ્રસવેનોદ્ગ્રાભેણોદગ્રભીત્ ।
અથાસપત્ના ꣳ ઇન્દ્રોમેનિગ્રાભેણાધરા ꣳ અકઃ ।
ઉદ્ગ્રાભઞ્ચનિગ્રાભઞ્ચબ્રહ્મદેવા
અવીવૃધન્।  અથાસપત્નાનિન્દ્રાગ્નીમેવિષૂચીનાન્ વ્યસ્યતામ્।
વસુભ્યસ્ત્વારુદ્રેભ્યસ્ત્વાઽઽદિત્યેભ્યસ્ત્વાઽક્ત ꣳ રિહાણાવિયન્તુવયઃ
।
પ્રજાંયોનિમ્માનિર્મૃક્ષમાપ્યાયન્તામાપઓષધયોમરુતામ્પૃષતયસ્થદિવઙ્ગચ્છ

તતોનોવૃસ્ષ્ટિમેરય। આયુષ્પા

અગ્નેઽસ્યાયુર્મેપાહિચક્ષુષ્પાઽગ્નેઽસિચક્ષુર્મેપાહિધ્રુવાઽ

સિયમ્પરિધિમ્પર્યધત્થા

અગ્નેદેવપણિભિર્વીયમાણઃ। તંતએતમનુજોષમ્ભરામિ

નેદેષત્વદપચેતયાતૈયજ્ઞસ્યપાથઉપસમિત ँ સ ँ સ્રાવભાગાસ્થેષાબૃહન્તઃ

પ્રસ્તરેષ્ઠાબર્હિષદશ્ચદેવા

ઇમાંવાચમભિવિશ્વેગૃણન્ત આસદ્યાસ્મિન્બર્હિષિ

માદયધ્વમગ્નેર્વામપન્નગૃહસ્યસદસિસાદયામિસુમ્નાયસુમ્નિનીસુમ્નેમાદધ્દ્વંધુરિધુર્યોપાથ

મગ્નેઽદ્બ્ધાયોઽશીતતનોપાહિમાઽદ્યદિવઃપાહિપ્રસિત્યૈપાહિદુરિષ્ટ્યૈપાહિદુરદ્મન્યૈપાહિ

દુશ્ચરિતાદવિષંનઃપિતુંકૃણુ

સુષદાયોનિ ँ સ્વાહાદેવાગાતુવિદોગાતું

વિત્ત્વાગાતુમિત મનસસ્પત

ઇમંનોદેવદેવેષુયજ્ઞ ँ સ્વાહાવાચિસ્વાહાવાતેધાઃ ॥

૧ . ૧. ૧૩ ॥

ઉભાવામિન્દ્રાગ્નીઆહુવધ્યાઉભારાધસસ્સહમાદયધ્યૈ ।

ઉભાદાતારાવિષા ँ રયીણામુભાવાજસ્યસાતયેહુવેવામ્ ॥

અશ્વવ ँ હિભૂરિદાવત્તરા વાં વિજામાતુરુતવાઘાસ્યાલાત્ ।

અથાસોમસ્યપ્રયતી યુવભ્યામિન્દ્રાગ્નીસ્તોમંજનયામિનવ્યમ્ ॥

ઇન્દ્રાગ્નીનવતિમ્પુરોદાસપત્નીરધૂનુતમ્। સાકમેકેનકર્મણા ॥

શુચિંનુસ્તોમંનવજાતમદ્યેન્દ્રાગ્નીવૃત્રહણાજુષેથામ્ ।

ઉભાહિવા ँ સુહવા જોહવીમિતાવાજ ँ સદ્ય ઉશતેધેષ્ઠા ॥

વયમુત્વાપથસ્પતેરથંન વાજસાતયે । ધિયેપૂષન્નયુજ્મહિ ॥

પથસ્પથઃપરિપતિં વચસ્યાકામેન કૃતો અભ્યાનડ્ઽર્કમ્।

સનોરાસચ્છુરુધશ્ચન્દ્રાગ્રાધિયંધિય ँ સીષધાતિપ્રપૂષા ॥

ક્ષેત્રસ્યપતિનાવય ँ હિતેનેવજયામસિ ।

ગામશ્વમ્પોષયિન્ત્વાસનોમૃડાતીદૃશે ॥

ક્ષેત્રસ્યપતેમધુમન્તમૂર્મિંધેનુરિવપયોઅસ્માસુધુક્ષ્વ ।

મધુશ્ચુતં ઘૃતમિવસુપૂતમૃતસ્યનઃપતયોમૃડયન્તુ ॥

અગ્નેનયસુપથારાયે અસ્માન્વિશ્વાનિદેવવયુનાનિવિદ્વાન્ ।

યુયોધ્યસ્મજ્જુહુરાણમેનોભૂયિષ્ઠાંતેનમઉક્તિંવિધેમ ॥

આદેવાનામપિ પન્થામગન્મયચ્છક્નવામતદનુપ્રવોઢુમ્ ।

અગ્નિર્વિદ્વાન્ત્સયજાત્સેદુહોતાસો અધ્વરાન્ત્સઋતૂન્કલ્પયાતિ ॥

યદ્વાહિષ્ઠતદગ્નયેબૃહદર્ચવિભાવસો । મહિષીવત્વદ્રયિસ્ત્વદ્વાજાઉદીરતે ॥

અગ્નેત્વમ્પારયાનવ્યોઅસ્માન્થ્સ્વસ્તિભિરતિદુર્ગાણિવિશ્વા ।

પૂશ્ચપૃથિવીબહુલાનઉર્વીભવાતોકાયતનયાયશંયોઃ ॥

ત્વમગ્નેવ્રતપા અસિદેવ આમર્ત્યેષ્વા। ત્વંયજ્ઞેષ્વીડ્યઃ ॥

યદ્વોવયમ્પ્રમિનામવ્રતાનિવિદુષાંદેવા અવિદુષ્ટરાસઃ ।

અગ્નિષ્ટદ્વિશ્વમાપૃણાતિવિદ્વાન્ યેભિર્દેવાઁ ઋતુભિઃકલ્પયાતિ ॥ ૧. ૧. ૧૪ ॥

॥ ઇતિ પ્રથમકાણ્ડે પ્રથમઃ પ્રપાઠકઃ (પ્રશ્નઃ)

Encoded with accents by Rajagopal Iyer rajsand@yahoo.com

Proofread by VENKATAVARAHAN ternandanan@satyam.net.in

*Taittiriya Samhita 1*

pdf was typeset on August 3, 2020

Please send corrections to *sanskrit@cheerful.com*